# अध्यायः १४

# गुणत्रयविभागयोगः

**अवतरणिकाभाष्यम्**

सर्वमुत्पद्यमानं क्षेत्र-क्षेत्रज्ञ-संयोगाद् उत्पद्यते इत्युक्तम्।

तत् कथमिति तत्प्रदर्शनार्थं परं भूयः इत्यादिरध्याय आरभ्यते।

अथवा ईश्वर-परतन्त्रयोः क्षेत्र-क्षेत्रज्ञयोः जगत्-कारणत्वं, न तु सांख्यानामिव स्वतन्त्रयोरित्येवमर्थम्।

प्रकृतिस्थत्वं गुणेषु च सङ्गः संसार-कारणमित्युक्तम्।

१) कस्मिन्गुणे कथं सङ्गः, २) के वा गुणाः, ३) कथं वा ते बध्नन्तीति,

४) गुणेभ्यश्च मोक्षणं कथं स्यात् ५) मुक्तस्य च लक्षणं वक्तव्यमित्येवमर्थं च -

**श्रीभगवानुवाच।**

**परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम्।**

**यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः।। १४.१ ।।**

परं भूय इति। परं ज्ञानमिति व्यवहितेन सम्बन्धः।

**भूयः** पुनः पूर्वेषु सर्वेष्वध्यायेष्वसकृद् उक्तमपि **प्रवक्ष्यामि**। तच्च **परं** पर-वस्तु-विषयत्वात्।

किं तत् **ज्ञानं** सर्वेषां **ज्ञानानाम्** **उत्तमम्** उत्तम-फलत्वात्।

ज्ञानानामिति न अमानित्वादीनां, किं तर्हि यज्ञादि-ज्ञेय-वस्तु-विषयाणामिति।

तानि न मोक्षाय, इदं तु मोक्षायेति परोत्तम-शब्दाभ्यां स्तौति श्रोतृ-बुद्धि-रुच्युत्पादनार्थम्।

**यज्ज्ञात्वा** यज्ज्ञानं ज्ञात्वा प्राप्य **मुनयः** संन्यासिनो मनन-शीलाः **सर्वे** **परां** **सिद्धिं** मोक्षाख्यां **इतः**

अस्माद्देहबन्धनादूर्ध्वं **गताः** प्राप्ताः।। १ ।।

अस्याश्च सिद्धेरैकान्तिकत्वं दर्शयति -

**इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः।**

**सर्गेपि नोपजायन्ते प्रलये न व्यथन्ति च।। १४.२ ।।**

इदमिति। **इदं** **ज्ञानं** यथोक्तम् **उपाश्रित्य** ज्ञान-साधनमनुष्ठायेत्येतत्।

**मम** परमेश्वरस्य **साधर्म्यं** मत्स्वरूपताम् **आगताः** प्राप्ता इत्यर्थः। न तु समान-धर्मतां साधर्म्यम्।

क्षेत्रज्ञेश्वरयोर्भेदानभ्युपगमाद् गीता-शास्त्रे। फलवादश्चायं स्तुत्यर्थमुच्यते।

**सर्गेऽपि** सृष्टि-कालेऽपि **न** **उपजायन्ते** नोत्पद्यन्ते।

**प्रलये** ब्रह्मणोऽपि विनाश-काले **न** **व्यथन्ति** **च** व्यथां नापद्यन्ते, न च्यवन्तीत्यर्थः।। २ ।।

क्षेत्र-क्षेत्रज्ञ-संयोग ईदृशः भूत-कारणमित्याह -

**मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम्।**

**सम्भवः सर्वभूतानां ततो भवति भारत।। १४.३ ।।**

ममेति। **मम** स्व-भूता मदीया माया त्रिगुणात्मिका प्रकृतिः **योनिः** सर्व-भूतानां कारणम्।

सर्व-कार्येभ्यो महत्वाद्भरणाच्च स्व-विकाराणां **महद्ब्रह्म** इति योनिरेव विशिष्यते।

**तस्मिन्** महति ब्रह्मणि योनौ **गर्भं** हिरण्यगर्भस्य जन्मनो बीजं, सर्व-भूत-जन्म-कारणं बीजं **दधामि** निक्षिपामि। क्षेत्र-क्षेत्रज्ञ-प्रकृति-द्वय-शक्तिमानीश्वरः **अहम्**।

अविद्या-काम-कर्मोपाधि-स्वरूपानुविधायिनं क्षेत्रज्ञं क्षेत्रेण संयोजयामीत्यर्थः। **सम्भवः** उत्पत्तिः **सर्व-भूतानां** हिरण्यगर्भोत्पत्ति-द्वारेण **ततः** तस्माद् गर्भाधानाद् **भवति** हे **भारत**।। ३ ।।

**सर्वयोनिषु कौन्तेय मूर्त्तयः सम्भवन्ति याः।**

**तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता।। १४.४ ।।**

सर्वयोनिष्विति। देव-पितृ-मनुष्य-पशु-मृगादि-**सर्वयोनिषु** **कौन्तेय** **मूर्त्तयः** देह-संस्थान-लक्षणा मूर्च्छिताङ्गावयवा मूर्त्तयः **सम्भवन्ति** **याः** **तासां** मूर्त्तीनां **ब्रह्म** **महत्** सर्वावस्थं **योनिः** कारणम् **अहम्** ईश्वरो **बीजप्रदः** गर्भाधानस्य कर्त्ता **पिता**।। ४ ।।

के गुणाः कथं बध्नन्ति इत्युच्यते -

**सत्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।**

**निबध्नन्ति महाबाहो देहे देहिनमव्ययम्।। १४.५ ।।**

सत्वमिति। **सत्वं रजस्तम इति** एवं नामानः, **गुणाः** इति पारिभाषिकः शब्दः, न रूपादिवद् द्रव्याश्रिताः, न च गुणगुणिनोरन्यत्वमत्र विवक्षितम्। तस्माद् गुणा इव [1] नित्य-परतन्त्राः क्षेत्रज्ञं प्रति, अविद्यात्मकत्वात् क्षेत्रज्ञं निबध्नन्तीव। तमास्पदीकृत्य आत्मानं प्रतिलभन्ते[2] इति निबध्नन्तीत्युच्यते[3]।

---

[1] सत्वरजस्तमोगुणाः द्रव्याश्रितगुणवत् क्षेत्रज्ञं प्रति नित्यपरतन्त्राः। अविद्याकार्याणि अविद्यात्मकानि। अचेतनत्वात् चेतनपरतन्त्रा अविद्या तत्कार्याणि च।

[2] तमाधारीकृत्य स्वरूपं प्राप्नुवन्ति गुणाः।

[3] आत्मानं प्रतिलभन्ते इति हेतोः कथं निबध्नन्तीत्युच्यते। आत्मनि कल्पितत्वेन गुणानां आत्मस्वरूपावरणद्वारा तद्-बन्धकत्वमित्यर्थः।

ते च **प्रकृतिसम्भवाः** भगवन्माया-सम्भवाः।

**निबध्नन्ति** इव हे **महाबाहो** महान्तौ समर्थतरौ आजानु-प्रलम्बौ बाहू यस्य सः महाबाहुः हे महाबाहो।

**देहे** शरीरे **देहिनं** देहवन्तम् **अव्ययम्** अव्ययत्वं चोक्तम् अनादित्वात् (गी १३.३१) इत्यादि-श्लोकेन।

**आक्षेपः**

ननु देही न लिप्यते (गी १३.३१) इत्युक्तं तत् कथमिह निबध्नन्ति इत्यन्यथोच्यते।

**समाधानम्**

परिहृतमस्माभिः इव शब्देन निबध्नन्ति इव इति।। ५ ।।

**तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम्।**

**सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ।। १४.६ ।।**

तत्र सत्त्वमिति। **तत्र** सत्वादीनां सत्वस्यैव तावद् लक्षणमुच्यते। **निर्मलत्वात्** स्फटिक-मणिः इव **प्रकाशकम्** **अनामयं** निरुपद्रवं **सत्त्वं** तद् **निबध्नाति**। **कथम्** **सुखसङ्गेन** सुख्यहमिति विषय-भूतस्य सुखस्य विषयिण्यात्मनि संश्लेषापादनं मृषैव सुखे सञ्जनमिति। सैषा अविद्या। न हि विषय-धर्मो विषयिणो भवति। इच्छादि च धृत्यन्तं क्षेत्रस्यैव विषयस्य धर्म इत्युक्तं भगवता। अतोऽविद्ययैव स्वकीय-धर्म-भूतया विषय-विषय्यविवेक-लक्षणया अस्वात्म-भूते सुखे सञ्जयतीव आसक्तमिव करोति, असङ्गं सक्तमिव करोति, असुखिनं सुखिनमिव। तथा **ज्ञानसङ्गेन** **च** ज्ञानमिति सुखसाहचर्यात् क्षेत्रस्यैव विषयस्यान्तः-करणस्य धर्मो नात्मनः, आत्म-धर्मत्वे सङ्गानुपपत्तेः बन्धानुप-पत्तेश्च।

सुखे इव ज्ञानादौ सङ्गो मन्तव्यो हे **अनघ** अव्यसन।। ६ ।।

**रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।**

**तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्।। १४.७ ।।**

रज इति। **रजो** **रागात्मकं** रञ्जनाद्रागो गैरिकादिवद्रागात्मकं **विद्धि** जानीहि।

**तृष्णासङ्गसमुद्भवं** तृष्णा अप्राप्ताभिलाषः, आसङ्गः प्राप्ते विषये मनसः प्रीति-लक्षणः संश्लेषः,

तृष्णाऽऽसङ्गयोः समुद्भवं तृष्णासङ्ग-समुद्भवम्।

**तन्निबध्नाति** तद्रजः निबध्नाति **कौन्तेय** **कर्मसङ्गेन** दृष्टादृष्टार्थेषु कर्मसु सञ्जनं तत्परता कर्म-सङ्गः,

तेन निबध्नाति रजो **देहिनम्**।। ७ ।।

**तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।**

**प्रमादालस्यनिद्राभिः तन्निबध्नाति भारत।। १४.८ ।।**

तमस्त्विति। **तमः** तृतीयो गुणः **अज्ञानजं** अज्ञानाज्ञातमज्ञानजं **विद्धि** **मोहनं** मोह-करम् अविवेककरं **सर्वदेहिनां** सर्वेषां देहवताम्।

**प्रमादालस्यनिद्राभिः** प्रमादश्च आलस्यं च निद्रा च प्रमादालस्यनिद्राः ताभिः प्रमादालस्यनिद्राभिः **तत्** तमः **निबध्नाति** **भारत**।। ८ ।।

पुनर्गुणानां व्यापारः संक्षेपत उच्यते -

**सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत।**

**ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत।। १४.९ ।।**

सत्वमिति। **सत्त्वं** **सुखे** **सञ्जयति** संश्लेषयति **रजः** **कर्मणि** हे **भारत** सञ्जयतीति अनुवर्त्तते।

**ज्ञानं** सत्त्व-कृतं विवेकं **आवृत्य** आच्छाद्य **तु** **तमः** स्वेनावरणात्मना **प्रमादे** **सञ्जयत्युत** प्रमादो नाम

प्राप्त-कर्त्तव्याकरणम्।। ९ ।।

उक्तं कार्यं कदा कुर्वन्ति गुणाः इत्युच्यते -

**रजस्तमश्चाभिभूय सत्त्वं भवति भारत।**

**रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तदा।। १४.१० ।।**

रजस्तम इति। **रजस्तमश्च** उभावपि **अभिभूय** **सत्त्वं** **भवति** उद्भवति वर्धते यदा, तदा लब्धात्मकं सत्त्वं

स्व-कार्यं ज्ञान-सुखाद्यारभते हे **भारत**।

तथा **रजो-**गुणः **सत्त्वं** **तमश्चैव** उभावप्यभिभूय वर्धते यदा, तदा कर्म-तृष्णादि स्वकार्यमारभते।

**तम**आख्यो गुणः **सत्त्वं** **रजः** च उभावप्यभिभूय तथैव वर्धते यदा, **तदा** ज्ञानावरणादि स्वकार्यमारभते।।

१० ।।

यदा यो गुण उद्भूतो भवति तदा तस्य किं लिङ्गमिति। उच्यते -

**सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते।**

**ज्ञानं यदा तदा विद्याद् विवृद्धं सत्त्वमित्युत।। १४.११ ।।**

सर्वद्वारेष्विति। **सर्वद्वारेषु** आत्मन उपलब्धि-द्वाराणि श्रोत्रादीनि सर्वाणि करणानि, तेषु सर्वद्वारेषु अन्तः-

करणस्य बुद्धेर्वृत्तिः **प्रकाशः** **देहेऽस्मिन्** **उपजायते**। तदेव **ज्ञानम्**।

**यदा** एवं प्रकाशो ज्ञानाख्य उपजायते **तदा** ज्ञान-प्रकाशेन लिङ्गेन **विद्याद्** **विवृद्धम्** उद्भूतं **सत्त्वमिति**

**उत** अपि।। ११ ।।

रजस उद्भूतस्येदं चिह्नम् -

**लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा।**

**रजस्येतानि जायन्ते विवृद्धे भरतर्षभ।। १४.१२ ।।**

लोभ इति। **लोभः** पर-द्रव्यादित्सा **प्रवृत्तिः** प्रवर्त्तनं सामान्य-चेष्टा। **आरम्भः** कस्य **कर्मणाम्**।

**अशमः** अनुपशमः, हर्ष-रागादि-प्रवृत्तिः। **स्पृहा** सर्व-सामान्य-वस्तु-विषया तृष्णा।

**रजसि** गुणे **विवृद्धे** **एतानि** लिङ्गानि **जायन्ते** हे **भरतर्षभ**।। १२ ।।

**अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च।**

**तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन।। १४.१३ ।।**

अप्रकाश इति। **अप्रकाशः** अविवेकः। अत्यन्तम् **अप्रवृत्तिश्च** प्रवृत्त्यभावः।

तत्कार्यं **प्रमादः**। **मोह** **एव** **च** अविवेको मूढतेत्यर्थः।

**तमसि** गुणे **विवृद्धे** **एतानि** लिङ्गानि **जायन्ते** हे **कुरुनन्दन**।। १३।।

मरण-द्वारेणापि यत्फलं प्राप्यते तदपि सङ्ग-राग-हेतुकं सर्वं गौणमेवेति (गुणजन्यमेव) दर्शयन्नाह -

**यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत्।**

**तदोत्तमविदां लोकान् अमलान् प्रतिपद्यते।। १४.१४ ।।**

यदेति। **यदा** **सत्त्वे** **प्रवृद्धे** उद्भूते **तु** **प्रलयं** मरणं **याति** प्रतिपद्यते **देहभृद्** आत्मा **तदा** **उत्तमविदां**

महदादि-तत्त्व-विदामित्येतत्।

**लोकान्** **अमलान्** मल-रहितान् **प्रतिपद्यते** प्राप्नोति इत्येतत्।। १४।।

**रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते।**

**तथा प्रलीनस्तमसि मूढयोनिषु जायते।। १४.१५ ।।**

रजसीति। **रजसि** गुणे विवृद्धे **प्रलयं** मरणं **गत्वा** प्राप्य **कर्मसङ्गिषु** कर्मासक्ति-युक्तेषु मनुष्येषु **जायते**।

**तथा** तद्वद् **प्रलीनः** मृतः **तमसि** विवृद्धे **मूढयोनिषु** पश्वादि-योनिषु **जायते**।। १५ ।।

अतीत-श्लोकार्थस्यैव संक्षेप उच्यते -

**कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम्।**

**रजसस्तु फलं दुःखमज्ञानं तमसः फलम्।। १४.१६ ।।**

कर्मण इति। **कर्मणः** **सुकृतस्य** सात्त्विकस्य इत्यर्थः। **आहुः** शिष्टाः।

**सात्त्विकम्** एव **निर्मलं** **फलम्** इति। **रजसस्तु** **फलं** **दुःखम्**।

राजसस्य कर्मण इत्यर्थः, कर्माधिकारात् [4]। फलमपि दुःखमेव कारणानुरूप्याद् राजसमेव।

तथा **अज्ञानं** **तमसः** तामसस्य कर्मणोऽधर्मस्य पूर्ववत्।। १६ ।।

---

[4] रजश्शब्दस्य राजसे कर्मणि कुतो वृत्तिः इत्याक्षेपस्य समाधानम्।

किञ्च गुणेभ्यो भवति -

**सत्त्वात् सञ्जायते ज्ञानं रजसो लोभ एव च।**

**प्रमादमोहौ तमसो भवतोऽज्ञानमेव च।। १४.१७ ।।**

सत्त्वादिति। **सत्त्वाद्** लब्धात्मकात् **सञ्जायते** समुत्पद्यते **ज्ञानम्**।

**रजसो** **लोभ** **एव** **च**।

**प्रमादमोहौ** चोभौ **तमसो** **भवतः**। **अज्ञानमेव** **च** भवति।। १७ ।।

किञ्च -

**ऊर्ध्वं गच्छन्ति सत्त्वस्थाः मध्ये तिष्ठन्ति राजसाः।**

**जघन्यगुणवृत्तस्था अधो गच्छन्ति तामसाः।। १४.१८ ।।**

ऊर्ध्वमिति। **ऊर्ध्वं** **गच्छन्ति** देव-लोकादिषूत्पद्यन्ते **सत्त्वस्थाः** सत्त्व-गुण-वृत्तस्थाः।

**मध्ये** **तिष्ठन्ति** मनुष्येषूत्पद्यन्ते **राजसाः**।

**जघन्यगुणवृत्तस्था** जघन्यश्चासौ गुणश्च जघन्य-गुणः, तमः, तस्य वृत्तं निद्रालस्यादि, तस्मिन् स्थिताः

जघन्य-गुण-वृत्तस्थाः, मूढाः **अधो** **गच्छन्ति** पश्वादिषूत्पद्यन्ते **तामसाः**।। १८ ।।

**अवतरणभाष्यम्**

पुरुषस्य, प्रकृतिस्थत्व-रूपेण मिथ्या-ज्ञानेन युक्तस्य, भोग्येषु गुणेषु सुख-दुःख-मोहात्मकेषु सुखी, दुःखी,

मूढोऽहम् इत्येवं-रूपो यः सङ्गः तत्कारणं पुरुषस्य सदसद्योनि-जन्म-प्राप्ति-लक्षणस्य संसारस्येति समासेन

पूर्वाध्याये यदुक्तं, तदिह सत्त्वं रजस्तम इति गुणाः प्रकृति-सम्भवाः (गी १४.५) इत्यत आरभ्य

१) गुण-स्वरूपं,

२) गुण-वृत्तं,

३) स्व-वृत्तेन च गुणानां बन्धकत्वं,

४) गुण-वृत्त-निबन्धनस्य च पुरुषस्य या गतिः,

इत्येतत्सर्वं मिथ्या-ज्ञानमज्ञान-मूलं च बन्ध-कारणं विस्तरेणोक्त्वा, अधुना सम्यग्दर्शनान्मोक्षो वक्तव्य

इत्याह भगवान् -

**नान्यं गुणेभ्यः कर्त्तारं यदा द्रष्टाऽनुपश्यति**

**गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति।। १४.१९ ।।**

नान्यमिति। **न** **अन्यं** कार्य-करण-विषयाकार-परिणतेभ्यः **गुणेभ्यः** **कर्त्तारम्** अन्यं **यदा** **द्रष्टा** विद्वान् सन्न **अनुपश्यति**।

गुणा एव सर्वावस्थाः सर्व-कर्मणां कर्त्तार इत्येवं पश्यति।

**गुणेभ्यश्च** **परं** गुण-व्यापार-साक्षि-भूतं **वेत्ति** **मद्भावं** मम भावं **सः** द्रष्टा **अधिगच्छति**।। १९ ।।

कथमधिगच्छतीत्युच्यते -

**गुणानेतानतीत्य त्रीन् देही देहसमुद्भवान्।**

**जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते।। १४.२० ।।**

गुणानिति। **गुणानेतान्** यथोक्तान् **अतीत्य** जीवन्नेवातिक्रम्य मायोपाधि-भूतान् **त्रीन्देही** **देहसमुद्भवान्**

दोहोत्पत्ति-बीज-भूतान् **जन्ममृत्युजरादुःखैः** जन्म च मृत्युश्च जरा च दुःखानि च जन्म-मृत्यु-जरा-

दुःखानि तैर्जीवन्नेव **विमुक्तः** सन्विद्वान् **अमृतमश्नुते**।

एवं मद्भावमधिगच्छतीत्यर्थः।। २० ।।

जीवन्नेव गुणानतीत्यामृतमश्नुते इति प्रश्न-बीजं प्रतिलभ्य अर्जुन उवाच -

**कैर्लिङ्गैस्त्रीन्गुणानेतानतीतो भवति प्रभो।**

**किमाचारः कथं चैतान् त्रीन्गुणान् अतिवर्त्तते।। १४.२१ ।।**

कैर्लिङ्गैरिति। **कैर्लिङ्गैः** चिह्नैः **त्रीन्** **एतान्** व्याख्यातान् **गुणान्** **अतीतः** अतिक्रान्तो **भवति** हे **प्रभो**।

**किमाचारः** कोऽस्याचार इति किमाचारः।

**कथं** केन च प्रकारेण **एतान्** **त्रीन्गुणान्** **अतिवर्त्तते** अतीत्य वर्त्तते।। २१ ।।

गुणातीतस्य लक्षणं गुणातीतत्वोपायं च अर्जुनेन पृष्टोऽस्मिन् श्लोके। प्रश्नद्वयार्थं प्रतिवचनं भगवानुवाच।

यत्तावत् कैर्लिङ्गैर्युक्तो गुणातीतो भवति तच्छृणु -

**श्रीभगवानुवाच।**

**प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव।**

**न द्वेष्टि संप्रवृत्तानि न निवृत्तानि काङ्क्षति।। १४.२२ ।।**

प्रकाशमिति। **प्रकाशं** **च** सत्त्व-कार्यं **प्रवृत्तिं** **च** रजः-कार्यं **मोहमेव** **च** तमः-कार्यं इत्येतानि **न** **द्वेष्टि** **संप्रवृत्तानि** सम्यग्विषय-भावेनोद्भूतानि।

मम तामसः प्रत्ययो जातः, तेनाहं मूढः तथा राजसी प्रवृत्तिर्ममोत्पन्ना, दुःखात्मिका, तेनाहं रजसा प्रवर्त्तितः प्रचलितः स्वरूपात्, कष्टं मम वर्त्तते योऽयं मत्स्वरूपावस्थानाद् भ्रंशः तथा सात्विको गुणः

प्रकाशात्मा मां विवेकित्वमापादयन् सुखे च सञ्जयन् बध्नाति इति तानि द्वेष्ट्यसम्यग्दर्शित्वेन।

तदेवं गुणातीतो न द्वेष्टि संप्रवृत्तानि।

यथा च सात्त्विकादि-पुरुषः सत्त्वादि-कार्याणि आत्मानं प्रति प्रकाश्य निवृत्तानि काङ्क्षति,

न तथा गुणातीतः **न निवृत्तानि काङ्क्षति** इत्यर्थः।

एतन्न पर-प्रत्यक्षं लिङ्गम्। किं तर्हि स्वात्म-प्रत्यक्षत्वाद् आत्मविषयमेवैतल्लक्षणम्।

न हि स्वात्म-विषयं द्वेषमाकाङ्क्षां वा परः पश्यति।। २२ ।।

अथेदानीं गुणातीतः किमाचारः इति प्रश्नस्य प्रति-वचनमाह -

**उदासीनवदासीनो गुणैर्यो न विचाल्यते।**

**गुणा वर्त्तन्त इत्येव योऽवतिष्ठति नेङ्गते।। १४.२३ ।।**

उदासीनवदिति। **उदासीनवद्** यथोदासीनो न कस्यचित्पक्षं भजते तथाऽयं गुणातीतत्वोपाय-मार्गेऽवस्थितः

**आसीनः** आत्मविद् **गुणैः** **यः** संन्यासी **न** **विचाल्यते** विवेक-दर्शनावस्थातः।

तदेतत् स्फुटीकोरति **गुणाः** कार्य-करण-विषयाकार-परिणताः अन्योन्यस्मिन् **वर्त्तन्ते** **इति** **योऽवतिष्ठति**।

छन्दो-भङ्ग-भयात् परस्मै-पद-प्रयोगः। योऽनु-तिष्ठतीति वा पाठान्तरम्। **नेङ्गते** न चलति।

स्वरूपावस्थ एव भवतीत्यर्थः।। २३ ।।

किञ्च -

**समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः**

**तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः।। १४.२४ ।।**

समदुःखेति। **समदुःखसुखः** समे दुःख-सुखे यस्य स सम-दुःख-सुखः।

**स्वस्थः** स्वे आत्मनि स्थितः प्रसन्नः।

**समलोष्टाश्मकाञ्चनः** लोष्टं चाश्मा च काञ्चनं च समानि यस्य स सम-लोष्टाश्म-काञ्चनः।

**तुल्यप्रियाप्रियः** प्रियं चाप्रियं च प्रियाप्रिये तुल्ये समे यस्य सोऽयं तुल्य-प्रियाप्रियः। **धीरः** धीमान्।

**तुल्यनिन्दात्मसंस्तुतिः** निन्दा चाऽऽत्म-संस्तुतिश्च निन्दाऽऽत्म-संस्तुती, तुल्ये निन्दाऽऽत्म-संस्तुती यस्य यतेः स तुल्य-निन्दाऽऽत्म-संस्तुतिः।। २४ ।।

किञ्च -

**मानापमानयोस्तुल्यः तुल्यो मित्रारिपक्षयोः।**

**सर्वारम्भपरित्यागी गुणातीतः स उच्यते।। १४.२५ ।।**

मानेति। **मानापमानयोः** **तुल्यः** समो निर्विकारः। **तुल्यो** **मित्रारिपक्षयोः** यद्यप्युदासीना भवन्ति केचित् स्वाभिप्रायेण, तथापि पराभिप्रायेण मित्रारि-पक्षयोः इव भवन्तीति तुल्यो मित्रारि-पक्षयोरित्याह। **सर्वारम्भपरित्यागी** दृष्टादृष्टार्थानि कर्माणि, आरभ्यन्ते इत्यारम्भाः, सर्वानारम्भान् परित्यक्तुं शीलमस्येति सर्वारम्भ-परित्यागी, देह-धारण-मात्र-निमित्त-व्यतिरेकेण सर्व-कर्म-परित्यागी इत्यर्थः। **गुणातीतः** **स** **उच्यते**। उदासीनवद् इत्यादि गुणातीतः स उच्यते इत्येतदन्तमुक्तं यावद्यत्न-साध्यं तावत्संन्यासिनाऽनुष्ठेयं[5] गुणातीतत्व-साधनं मुमुक्षोः, स्थिरी-भूतं तु स्व-संवेद्यं सद् गुणातीतस्य यतेर्लक्षणं भवतीति।। २५ ।।

---

[5] यावत्पर्यन्तं यत्न-साध्यं भवति तावत्पर्यन्तं संन्यासिनाऽनुष्ठेयं सन् मुमुक्षोः गुणातीतत्व-साधनं भवति।

अधुना कथं च त्रीन् गुणान् अतिवर्त्तते इति प्रश्नस्य प्रति-वचनमाह -

**मां च योऽव्यभिचारेण भक्तियोगेन सेवते।**

**स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते।। १४.२६ ।।**

मामिति। **मां** **च** ईश्वरं नारायणं सर्व-भूत-हृदयाश्रितं **यो** यतिः कर्मी वा **अव्यभिचारेण** न कदाचिद्यो व्यभिचरति **भक्तियोगेन** भजनं भक्तिः सैव योगस्तेन भक्ति-योगेन **सेवते** **स** **गुणान्** **समतीत्यैतान्** यथोक्तान् **ब्रह्मभूयाय** भवनं भूयः, ब्रह्म-भूयाय ब्रह्म-भवनाय मोक्षाय **कल्पते** समर्थो भवतीत्यर्थः।। २६ ।।

कुत एतदित्युच्यते -

**ब्रह्मणो हि प्रतिष्ठाऽहम् अमृतस्याव्ययस्य च।**

**शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च।। १४.२७ ।।**

ओं तत्सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः।।

ब्रह्मण इति। **ब्रह्मणः** परमात्मनः **हि** यस्मात् **प्रतिष्ठाऽहं** प्रतितिष्ठत्यस्मिन्निति प्रतिष्ठाऽहं प्रत्यगात्मा।

कीदृशस्य ब्रह्मणः **अमृतस्य** अविनाशिनः। **अव्ययस्य** अविकारिणः। **शाश्वतस्य** **च** नित्यस्य **धर्मस्य** ज्ञान-योग-धर्म-प्राप्यस्य **सुखस्य** आनन्द-रूपस्य **ऐकान्तिकस्य** अव्यभिचारिणः।

अमृतादि-स्वभावस्य परमानन्द-स्वरूपस्य परमात्मनः प्रत्यगात्मा प्रतिष्ठा, सम्यग्ज्ञानेन परमात्मतया निश्चीयते।

तदेतद् ब्रह्म-भूयाय कल्पते इत्युक्तम्। यया चेश्वर-शक्त्या भक्तानुग्रहादि-प्रयोजनाय ब्रह्म प्रतिष्ठते प्रवर्त्तते

सा शक्तिः ब्रह्मैवाहं शक्ति-शक्तिमतोरनन्यत्वादित्यभिप्रायः।।

अथवा ब्रह्म-शब्द-वाच्यत्वात् सविकल्पकं ब्रह्म तस्य **ब्रह्मणो** निर्विकल्पकोऽहमेव नान्यः **प्रतिष्ठा**

आश्रयः। किं-विशिष्टस्य **अमृतस्य** अमरण-धर्मकस्य। **अव्ययस्य** व्यय-रहितस्य।

किञ्च **शाश्वतस्य** च नित्यस्य। **धर्मस्य** ज्ञान-निष्ठा-लक्षणस्य। **सुखस्य** तज्जनितस्य।

**ऐकान्तिकस्य** एकान्त-नियतस्य च। प्रतिष्ठाऽहमिति वर्त्तते।। २७ ।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ
श्रीमद्भगवद्गीताभाष्ये चतुर्दशोऽध्यायः।।

# अध्यायः १५

# पुरुषोत्तमयोगः

**अवतरण-भाष्यम्**

यस्माद् मदधीनं कर्मिणां कर्मफलं ज्ञानिनां च ज्ञान-फलमतो भक्ति-योगेन मां ये सेवन्ते ते मत्प्रसादाद्[6] ज्ञान-प्राप्ति-क्रमेण गुणातीता मोक्षं गच्छन्ति।

किमु वक्तव्यम् आत्मनः तत्त्वमेव सम्यग्विजानन्त इत्यतो भगवान् अर्जुनेनापृष्टोऽपि[7] आत्मनस्तत्त्वं विवक्षुरुवाच - ऊर्ध्वमूलमित्यादि। तत्र तावद् वृक्ष-रूपक-कल्पनया वैराग्य-हेतोः संसार-स्वरूपं वर्णयति, विरक्तस्य हि संसाराद् भगवतः[8] तत्त्व-ज्ञानेऽधिकारो नान्यस्येति -

**श्रीभगवानुवाच।**

**ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्।**

**छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्।। १५.१ ।।**

---

[6] मम प्रसादाद् इति पाठान्तरम्।

[7] अपृष्टमपि इति पाठान्तरम्।

[8] भगवत्तत्त्वज्ञाने इति पाठान्तरम्।

ऊर्ध्वमूलमिति। **ऊर्ध्वमूलं** १) कालतः सूक्ष्मत्वात्, २) कारणत्वात्, ३) नित्यत्वात्, ४) महत्वात् च ऊर्ध्वमुच्यते ब्रह्म अव्यक्तं[9] माया-शक्तिमत्, तन्मूलमस्येति सोऽयं संसार-वृक्ष ऊर्ध्व-मूलः। श्रुतेश्च ऊर्ध्वमूलोऽवाक्शाखः एषोश्वत्थः सनातनः (कठ २.३.१) इति। पुराणे च अव्यक्त-मूल-प्रभवः तस्यैवानुग्रहोच्छ्रितः। बुद्धिस्कन्धमयश्चैव इन्द्रियान्तर-कोटरः।। महा-भूत-विशाखश्च विषयैः पत्रवांस्तथा। धर्माधर्म-सुपुष्पश्च सुख-दुःख-फलोदयः।। आजीव्यः सर्व-भूतानां ब्रह्म-वृक्षः सनातनः। एतद् ब्रह्म-वनं चैव ब्रह्माचरति नित्यशः।। एतच्छित्वा च भित्वा च ज्ञानेन परमासिना। ततश्चात्मरतिं प्राप्य तस्मान्नावर्त्तते पुनः (म.भा.अश्व ४७.१२-१५) इत्यादि। तमूर्ध्वमूलं संसारं मायामयं वृक्षम्।

---

[9] ब्रह्म अव्यक्त-माया-शक्तिमत् इति पाठान्तरम्।

**अधःशाखं** महदहङ्कार-तन्मात्रादयः शाखा इव अस्याधो भवन्तीति सोऽयम् अधःशाखः तमधःशाखम्।

न श्वोऽपि स्थाता इत्यश्वत्थस्तं क्षण-प्रध्वंसिनम् **अश्वत्थम्**। **प्राहुः** कथयन्ति।

**अव्ययं** संसार-मायायाः अनादि-काल-प्रवृत्तत्वात् सोऽयं संसार-वृक्षः अव्ययः, अनाद्यनन्त-देहादि-सन्तानाश्रयो हि सुप्रसिद्धः, तमव्ययम्। तस्यैव संसार-वृक्षस्य इदम् अन्यद्विशेषणं **छन्दांसि** **यस्य** **पर्णानि** छन्दांसि छादनाद् ऋग्यजुस्साम-लक्षणानि यस्य संसार-वृक्षस्य पर्णानि पर्णानीव।

यथा वृक्षस्य परिरक्षणार्थानि पर्णानि, तथा वेदाः संसार-वृक्ष-परिरक्षणार्था धर्माधर्म-तद्धेतु-फल-प्रदर्शनार्थत्वात्। यथा-व्याख्यातं संसार-वृक्षं समूलं **यस्तं** **वेद** **स** **वेदवित्** वेदार्थविदित्यर्थः।

न हि समूलात् संसार-वृक्षादस्मात् ज्ञेयोऽन्योऽणुमात्रोऽप्यवशिष्टोऽस्त्यतः सर्वज्ञः सर्ववेदार्थविदिति[10] समूल-संसार-वृक्ष-ज्ञानं स्तौति।। १ ।।

---

[10] सर्वज्ञः स यो वेदार्थविद् इति पाठान्तरम्।

तस्यैव संसार-वृक्षस्यापरा अवयवकल्पनोच्यते -

**अधश्चोर्ध्वं प्रसृतास्तस्य शाखाः गुणप्रवृद्धा विषयप्रवालाः।**

**अधश्च मूलान्यनुसन्ततानि कर्मानुबन्धीनि मनुष्यलोके।। १५.२ ।।**

अधश्चेति। **अधः** मनुष्यादिभ्यो यावत् स्थावरम् **ऊर्ध्वं** **च** यावद् ब्रह्मणो विश्वसृजो धाम इत्येतदन्तं

यथा-कर्म यथा-श्रुतं ज्ञान-कर्म-फलानि **तस्य** वृक्षस्य **शाखा** इव शाखाः **प्रसृताः** प्रगताः।

**गुणप्रवृद्धा** गुणैः सत्त्व-रजस्-तमोभिः प्रवृद्धाः स्थूली-कृता उपादान-भूतैः।

**विषयप्रवाला** विषयाः शब्दादयः प्रवाला इव देहादि-कर्म-फलेभ्यः शाखाभ्यः अङ्कुरी भवन्तीव,

तेन विषय-प्रवालाः शाखाः। संसार-वृक्षस्य परम-मूलमुपादानं कारणं पूर्वमुक्तम्।

अथेदानीं कर्म-फल-जनित-राग-द्वेषादि-वासनाः मूलानीव धर्माधर्म-प्रवृत्ति-कारणानि अवान्तर-भावीनि

तानि **अधश्च** देहाद्यपेक्षया **मूलानि** **अनुसन्ततानि** अनुप्रविष्टानि।

**कर्मानुबन्धीनि** कर्म धर्माधर्म-लक्षणं अनुबन्धः पश्चाद्भावी येषामुद्भूतिमनु उद्भवति तानि

कर्मानुबन्धीनि।

**मनुष्यलोके** विशेषतोऽत्र हि मनुष्याणां कर्माधिकारः प्रसिद्धः।। २ ।।

यस्त्वयं वर्णितः संसारवृक्षः -

**न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठा।**

**अश्वत्थमेनं सुविरूढमूलं असङ्गशस्त्रेण दृढेन छित्त्वा।। १५.३ ।।**

न रूपमस्येति। **न** **रूपमस्येह** यथोपवर्णितं **तथा** नैव **उपलभ्यते** स्वप्न-मरीच्युदक-माया-गन्धर्व-नगर-समत्वात् दृष्ट-नष्ट-स्वरूपो हि स इत्यत एव। **नान्तो** न पर्यन्तो निष्ठा परिसमाप्तिर्वा विद्यते।

तथा **न** **चादिः** इत आरभ्यायं प्रवृत्त इति न केनचिद् गम्यते।

**न** **च** **संप्रतिष्ठा** स्थितिः मध्यमस्य न केनचिदुपलभ्यते। **अश्वत्थमेनं** यथोक्तं **सुविरूढमूलं** सुष्ठु विरूढानि विरोहं गतानि सुदृढानि मूलानि यस्य तमेनं सुविरूढ-मूलम् **असङ्गशस्त्रेण** असङ्गः पुत्र-वित्त-लोकैषणादिभ्यो व्युत्थानं तेनासङ्ग-शस्त्रेण **दृढेन** परमात्माभिमुख्य-निश्चय-दृढी-कृतेन पुनः पुनः विवेकाभ्यासाश्म-निशितेन **च्छित्त्वा** संसार-वृक्षं सबीजम् उद्धृत्य।। ३ ।।

**ततः पदं तत्परिमार्गितव्यम् यस्मिन् गता न निवर्त्तन्ति भूयः।**

**तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुरणी।। १५.४ ।।**

ततः इति। **ततः** पश्चात् **पदं** वैष्णवं **तत्परिमार्गितव्यम्** परिमार्गणमन्वेषणं ज्ञातव्यमित्यर्थः।

**यस्मिन्** पदे **गताः** प्रविष्टाः **न** **निवर्त्तन्ति** नावर्त्तन्ते **भूयः** पुनः संसाराय।

कथं परिमार्गितव्यमित्याह - **तमेव** **च** यः पद-शब्देनोक्तः **आद्यम्** आदौ भवं **पुरुषं** **प्रपद्ये** इत्येवं परिमार्गितव्यं तच्छरणतयेत्यर्थः।

कोऽसौ पुरुष इत्युच्यते - **यतः** यस्मात् पुरुषात् संसार-माया-वृक्ष-**प्रवृत्तिः** **प्रसृता** निःसृता ऐन्द्र-जालिकादिव माया **पुराणी** चिरन्तनी।। ४

कथंभूतास्तत्पदं गच्छन्तीत्युच्यते -

**निर्मानमोहा जितसङ्गदोषाः अध्यात्मनित्या विनिवृत्तकामाः।**

**द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञैः गच्छन्त्यमूढाः पदमव्ययं तत्।। १५.५ ।।**

निर्मानमोहा इति। **निर्मानमोहाः** मानश्च मोहश्च मान-मोहौ तौ निर्गतौ येभ्यस्ते निर्मान-मोहा मान-मोह-वर्जिताः। **जितसङ्गदोषाः** सङ्ग एव दोषः सङ्ग-दोषो जितः सङ्ग-दोषो यैस्ते जित-सङ्ग-दोषाः **अध्यात्मनित्याः** परमात्म-स्वरूपालोचन-नित्यास्तत्पराः **विनिवृत्त-कामाः** विशेषतो निर्लेपेन निवृत्ताः कामा येषां ते विनिवृत्त-कामाः यतयः संन्यासिनः।

**द्वन्द्वैः** प्रियाप्रियादिभिः **विमुक्ताः** **सुखदुःखसंज्ञैः** परित्यक्ताः **गच्छन्त्यमूढाः** मोह-वर्जिताः **पदमव्ययं** **तद्** यथोक्तम्।। ५ ।।

तदेव पदं पुनर्विशिष्यते -

**न तद्भासयते सूर्यः न शशाङ्को न पावकः।**

**यद् गत्वा न निवर्त्तन्ते तद्धाम परमं मम।। १५.६ ।।**

न तदिति। तद्धामेति व्यवहितेन धाम्ना सम्बध्यते।

**तद्** धाम तेजो-रूपं पदं **न** **भासयते** **सूर्यः** आदित्यः सर्वावभासन-शक्तिमत्वेऽपि सति।

तथा **न** **शशाङ्कः** चन्द्रः **न** **पावकः** नाग्निरपि।

**यद्** धाम वैष्णवं पदं **गत्वा** प्राप्य **न** **निवर्त्तन्ते** यच्च सूर्यादिर्न भासयते **तद्धाम** पदं **परमं** **मम** विष्णोः

यद् गत्वा न निवर्त्तन्ते इत्युक्तम्।। ६ ।।

ननु सर्वा हि गतिरागत्यन्ता। संयोगा विप्रयोगान्ताः (वा.रा) इति हि प्रसिद्धम्।

कथमुच्यते तद्धाम गतानां नास्ति निवृत्तिरिति श्रृणु तत्र कारणम् -

**ममैवांशो जीवलोके जीवभूतः सनातनः।**

**मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति।। १५.७ ।।**

ममेति। **ममैव** परमात्मनो नारायणस्य **अंशः** भागोऽवयव एकदेश इत्यनर्थान्तरम्।

**जीवलोके** जीवानां लोके संसारे **जीवभूतः** कर्त्ता भोक्ता इति प्रसिद्धः **सनातनः** चिरन्तनः।

यथा जल-सूर्यकः सूर्यांशो जल-निमित्तापाये सूर्यमेव गत्वा न निवर्त्तते तथा अयमप्यंशः तेनैवात्मना सङ्गच्छत्येवमेव। यथा वा घटाद्युपाधि-परिच्छिन्नो घटाद्याकाशः आकाशांशः सन् घटादि-निमित्तापाये आकाशं प्राप्य न निवर्त्तत इत्येवम्। अत उपपन्नमुक्तं यद् गत्वा न निवर्त्तन्ते (गी १५.६) इति।

**आक्षेपः**

ननु निरवयवस्य परमात्मनः कुतोऽवयव एकदेशोंऽश इति।

सावयवत्वे च विनाश-प्रसङ्गोऽवयव-विभागात्।

**समाधानम्**

नैष दोषः। अविद्या-कृतोपाधि-परिच्छिन्न एकदोशोंश इव कल्पितः यतः।

दर्शितः च अयमर्थः क्षेत्राध्याये विस्तरशः। स च जीवो मदंशत्वेन कल्पितः

कथं संसरति उत्क्रामति च इत्युच्यते - **मनःषष्ठानीन्द्रियाणि** श्रोत्रादीनि **प्रकृतिस्थानि** स्व-स्थाने कर्ण-

शष्कुल्यादौ प्रकृतौ स्थितानि **कर्षति** आकर्षति।। ७ ।।

कस्मिन् काले -

**शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः।**

**गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्।। १५.८ ।।**

शरीरमिति। **यच्चापि** यदा चापि **उत्क्रामति** **ईश्वरः** देहादि-सङ्घात-स्वामी जीवस्तदा कर्षतीति श्लोकस्य द्वितीय-पादोऽर्थवशात्प्राथम्येन सम्बध्यते[11]। यदा च पूर्वस्मात् शरीराच्छरीरान्तरम् **अवाप्नोति** तदा **गृहीत्वा** **एतानि** मनः-षष्ठानीन्द्रियाणि **संयाति** सम्यग्याति गच्छति।

किमिव इत्याह - **वायुः** पवनो **गन्धानिवाऽऽशयात्** पुष्पादेः।। ८।।

[11] ईश्वरः यच्चापि उत्क्रामति तदा प्रकृतिस्थानि मनः-षष्ठानीन्द्रियाणि कर्षति। ईश्वरः यद् (यदा) शरीरमवाप्नोति तदा वायुः आशयात् गन्धानिव एतानि गृहीत्वा संयाति। प्राथम्येन शरीरं यदवाप्नोति इत्यनेन।

कानि पुनस्तानीति -

**श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च।**

**अधिष्ठाय मनश्चायं विषयानुपसेवते।। १५.९ ।।**

श्रोत्रमिति। **श्रोत्रं** **चक्षुः** **स्पर्शनं** **च** त्वगिन्द्रियं **रसनं** **घ्राणमेव** **च** **मनश्च** षष्ठं प्रत्येकमिन्द्रियेण सह

**अधिष्ठाय** देहस्थो **विषयान्** शब्दादीन् **उपसेवते**।। ९ ।।

एवं देहगतं देहात् -

**उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितं**

**विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः।। १५.१० ।।**

अत्क्रामन्तमिति। **उत्क्रामन्तं** देहं पूर्वोपात्तं परित्यजन्तं **स्थितं** **वापि** देहे तिष्ठन्तं **भुञ्जानं** **वा** शब्दादींश्चोपलभमानं **गुणान्वितं** सुख-दुःख-मोहाद्यैर्गुणैरन्वितमनुगतं संयुक्तम् इत्यर्थः। एवं-भूतमप्येनमत्यन्त-दर्शन-गोचर-प्राप्तं **विमूढाः** दृष्टादृष्ट-विषय-भोग-बलाकृष्ट-चेतस्तया अनेकधा मूढाः **नानुपश्यन्ति**। अहो कष्टं वर्त्तते इत्यनुक्रोशति च भगवान्।

ये तु पुनः प्रमाण-जनित-ज्ञान-चक्षुषस्ते एनं **पश्यन्ति**। **ज्ञानचक्षुषः** विविक्त-दृष्टय इत्यर्थः।। १० ।।

केचित्तु -

**यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम्।**

**यतन्तोप्यकृतात्मानः नैनं पश्यन्त्यचेतसः।। १५.११ ।।**

यतन्त इति। **यतन्तः** प्रयत्नं कुर्वन्तो **योगिनश्च** समाहित-चित्ता **एनं** प्रकृतमात्मानं **पश्यन्ति** अयमहमस्मि इत्युपलभन्ते **आत्मनि** स्वस्यां बुद्धौ **अवस्थितम्**। **यतन्तोऽपि** शास्त्रादि-प्रमाणैः **अकृतात्मानः** असंस्कृतात्मानः तपसेन्द्रियजयेन च, दुश्चरितादनुपरता अशान्त-दर्पाः प्रयत्नं कुर्वन्तोऽपि **नैनं** **पश्यन्ति** **अचेतसः** अविवेकिनः।। ११ ।।

यत्पदं सर्वस्याऽवभासकमप्यग्न्यादित्यादिकं ज्योतिः नावभासयते यत्प्राप्ताश्च मुमुक्षवः पुनः संसाराभिमुखाः न निवर्त्तन्ते यस्य च पदस्योपाधि-भेदमनुविधीयमाना जीवाः, घटाकाशादय इव आकाशस्य, अंशाः तस्य पदस्य सर्वात्मत्वं सर्व-व्यवहारास्पदत्वञ्च विवक्षुः चतुर्भिः श्लोकैर्विभूति-संक्षेपमाह भगवान् -

**यदादित्यगतं तेजः जगद्भासयतेऽखिलम्।**

**यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्।। १५.१२ ।।**

यदादित्येति - **यदादित्यगतम्** आदित्याश्रयम्। किं तत् **तेजः** दीप्तिः प्रकाशः **जगद् भासयते** प्रकाशयति **अखिलं** समस्तं **यच्चन्द्रमसि** शश-भृति तेजोऽवभासकं वर्तते **यच्चाग्नौ** हुत-वहे **तत्तेजो विद्धि** विजानीहि **मामकं** मदीयं मम विष्णोः तज्ज्योतिः।

अथवा यद् आदित्य-गतं तेजश्चैतन्यात्मकं ज्योतिः, यच्चन्द्रमसि, यच्चाग्नौ, वर्त्तते तत्तेजो विद्धि मामकं

मदीयं मम विष्णोः तज्ज्योतिः।।

**आक्षेपः**

ननु स्थावरेषु जङ्गमेषु च तत्समानं चैतन्यात्मकं ज्योतिः। तत्र कथमिदं विशेषणं यदादित्यगतमित्यादि।

**समाधानम्**

नैष दोषः। सत्त्वाधिक्यादाविस्तरत्वोपपत्तेः[12]।

आदित्यादिषु हि सत्त्वमत्यन्त-प्रकाशमत्यन्त-भास्वरमतस्तत्रैवऽऽविस्तरं ज्योतिरिति तद्विशिष्यते।

न तु तत्रैव तदधिकमिति। यथा हि लोके तुल्येऽपि मुख-संस्थाने न काष्ठ-कुड्यादौ मुखम् आविर्भवति,

आदर्शादौ तु स्वच्छे स्वच्छतरे च तारतम्येनाविर्भवति तद्वत्।। १२ ।।

---

[12] आधिक्योपपत्तेः इति पाठान्तरम्।

किञ्च -

**गामाविश्य च भूतानि धारयाम्यहमोजसा।**

**पुष्णामि चौषधीस्सर्वाः सोमो भूत्वा रसात्मकः।। १५.१३ ।।**

गामिति। **गां** पृथिवीम् **आविश्य** प्रविश्य **धारयामि** **भूतानि** जगद् **अहम्** **ओजसा** बलेन।

मद्बलं काम-राग-विवर्जितमैश्वरं रूपं जगद्विधारणाय पृथिव्यामाविष्टं येन गुर्वी पृथिवी नाधः पतति,

न विदीर्यते च। तथा च मन्त्र-वर्णः येन द्यौरुग्रा पृथिवी च दृढा (तै.सं. ४.१.८) इति। स दाधार

पृथिवीम् (तै.सं. ४.१.८) इत्यादिश्च। अतो गामाविश्य च भूतानि चराचराणि धारयामीति युक्तमुक्तम्।

किञ्च पृथिव्यां जाताः **ओषधीः** **सर्वाः** व्रीहि-यवाद्याः **पुष्णामि** पुष्टिमतीः रस-स्वादुमतीश्च करोमि **सोमो**

**भूत्वा** **रसात्मकः** सोमः सन् रसात्मकः[13] रस-स्वभावः।

सर्व-रसानामाकरः सोमः। स हि सर्वा ओषधीः स्वात्म-रसानुप्रवेशेन पुष्णाति।। १३ ।।

[13] सोमः सर्वरसात्मकः इति पाठान्तरम्।

किञ्च -

**अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।**

**प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्।। १५.१४ ।।**

अहमिति। **अहम्** एव **वैश्वानरः** उदरस्थोऽग्निः **भूत्वा** अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे येनेदमन्नं पच्यते (बृ. ५.९.१) इत्यादि-श्रुतेः वैश्वानरः सन् **प्राणिनां** प्राणवतां **देहम्** **आश्रितः** प्रविष्टः **प्राणापानसमायुक्तः** प्राणापानाभ्यां समायुक्तः संयुक्तः **पचामि** पक्तिं करोमि **अन्नम्** अशनं **चतुर्विधं** चतुष्प्रकारं [14] भोज्यं, भक्ष्यं, चोष्यं, लेह्यं च। भोक्ता वैश्वानरोऽग्निः, भोज्यमन्नं सोमः, तदेतदुभयमग्नीषोमौ सर्वमिति पश्यतोऽन्न-दोष-लेपो न भवति।। १४ ।।

[14] यत् दन्तैरवखण्ड्यावखण्ड्य भक्ष्यतेऽपूपादि तद्भक्ष्यं चर्व्यमति चोच्यचे। यत्तु केवलं जिह्वया विलोड्य निगीर्यते सूपौदनादि तद्भोज्यम्। यत्तु जिह्वायां निक्षिप्य रसास्वादेन निगीर्यते किंच द्रवीभूतगुडरसालशिखरिण्यादि तल्लेह्यम्। यत्तु दन्तैर्निष्पीड्य रसांशं निगीर्यावशिष्टं त्यज्यते यथेक्षुदण्जडादि तच्छोष्यम्।

किञ्च -

**सर्वस्य चाहं हृदि सन्निविष्टः मत्तस्स्मृतिर्ज्ञानमपोहनं च।**

**वेदैश्च सर्वैरहमेव वेद्यः वेदान्तकृद्वेदविदेव चाहम्।। १५.१५ ।।**

सर्वस्येति। **सर्वस्य** प्राणि-जातस्य **अहम्** आत्मा सन् **हृदि** बुद्धौ **सन्निविष्टः**।

अतो **मत्त**: आत्मनः सर्व-प्राणिनां **स्मृतिः** **ज्ञानं** तद् **अपोहनम्** अपगमनं **च**।

येषां यथा पुण्य-कर्मिणां पुण्य-कर्मानुरोधेन ज्ञान-समृती भवतस्तथा पाप-कर्मिणां पाप-कर्मानुरूपेण

स्मृति-ज्ञानयोरपोहनं चापायनमपगमनं च। **वेदैश्च** **सर्वैरहमेव** परमात्मा **वेद्यः** वेदितव्यः।

**वेदान्तकृद्** वेदान्तार्थ-संप्रदाय-कृदित्यर्थः। **वेदविद्** वेदार्थ-विद् **एव** **चाहम्**।। १५ ।।

भगवतः ईश्वरस्य नारायणाख्यस्य विभूति-संक्षेप उक्तो विशिष्टोपाधि-कृतो यदादित्य-गतं तेजः (गी १५.१२) इत्यादिना। अथाधुना तस्यैव क्षराक्षरोपाधि-प्रविभक्ततया निरुपाधिकस्य केवलस्य स्वरूप-निर्दिधारयिषया उत्तरे श्लोका आरभ्यन्ते। तत्र सर्वमेव अतीतानागताध्यायार्थजातं त्रिधा राशीकृत्याह -

**द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।**

**क्षरस्सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते।। १५.१६ ।।**

द्वाविमौ इति। **द्वाविमौ** पृथग्राशीकृतौ **पुरुषौ** इत्युच्येते **लोके** संसारे।

**क्षरश्च** क्षरतीति क्षरो विनाशीत्येको राशिः, अपरः पुरुषः **अक्षरः** तद्विपरीतो भगवतो माया-शक्तिः।

क्षराख्यस्य पुरुषस्योत्पत्ति-बीजम् अनेक-संसारि-जन्तु-काम-कर्मादि-संस्काराश्रयः अक्षरः पुरुष उच्यते।

कौ तौ पुरुषावित्याह स्वयमेव भगवान् - **क्षरः** **सर्वाणि** **भूतानि** समस्तं विकार-जातमित्यर्थः।

**कूटस्थः** कूटो राशी राशिः इव स्थितः।

अथवा कूटो माया वञ्चना जिह्मता कुटिलतेति पर्यायाः।

अनेक-माया-वञ्चनादि-प्रकारेण स्थितः कूटस्थः।

संसार-बीजानन्त्यान्न क्षरति इति **अक्षरः** **उच्यते**।। १६ ।।

आभ्यां क्षराक्षराभ्यामन्यो विलक्षणः क्षराक्षरोपाधि-द्वय-दोषेणास्पृष्टः नित्य-शुद्ध-बुद्ध-मुक्त-स्वभावः -

**उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।**

**यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः।। १५.१७ ।।**

;

उत्तम इति। **उत्तमः** उत्कृष्टतमः **पुरुषः** **त्वन्यः** अत्यन्त-विलक्षण आभ्यां **परमात्मेति** परमश्चासौ देहाद्यविद्याकृताऽऽत्मभ्यः, आत्मा च सर्व-भूतानां प्रत्यक्चेतनः इत्यतः परमात्मेति **उदाहृतः** उक्तो वेदान्तेषु। स एव विशिष्यते **यो** **लोकत्रयं** भूर्भुवस्स्वराख्यं स्वकीयया चैतन्य-बल-शक्त्या **आविश्य** प्रविश्य **बिभर्त्ति** स्वरूप-सद्भाव-मात्रेण बिभर्त्ति धारयति।

**अव्ययः** नास्य व्ययो विद्यते इत्यव्ययः। कः **ईश्वरः** सर्वज्ञो नारायणाख्यः ईशन-शीलः।। १७ ।।

यथा-व्याख्यातस्येश्वरस्य पुरुषोत्तम इत्येतन्नाम प्रसिद्धम्। तस्य नाम-निर्वचन-प्रसिद्ध्या अर्थवत्वं नाम्नो दर्शयन् निरतिशयोऽहमीश्वर इत्यात्मानं दर्शयति भगवान् -

**यस्मात्क्षरमतीतोऽहम् अक्षरादपिचोत्तमः।**

**अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः।। १५.१८ ।।**

यस्मादिति। **यस्मात्** **क्षरमतीतोऽहं** संसार-माया-वृक्षमश्वत्थाख्यमतिक्रान्तोऽहम् **अक्षरादपि** संसार-माया-वृक्ष-बीज-भूतादपि **चोत्तमः** उत्कृष्टतमः ऊर्ध्वतमो वा।

**अतः** ताभ्यां क्षराक्षराभ्यामुत्तमत्वाद् **अस्मि** भवामि **लोके** **वेदे** च **प्रथितः** प्रख्यातः **पुरुषोत्तमः** इत्येवं मां भक्त-जनाः विदुः। कवयः काव्यादिषु चेदं नाम निबध्नन्ति। पुरषोत्तम इत्यनेन अभिधानेन अभिगृणन्ति।। १८ ।।

अथेदानीं यथा-निरुक्तमात्मानं यो वेद तस्येदं फलमुच्यते -

**यो मामेवमसम्मूढः जानाति पुरुषोत्तमम्।**

**स सर्वविद्भजति मां सर्वभावेन भारत।। १५.१९ ।।**

य इति। **यो** **माम्** ईश्वरं यथोक्तविशेषणम् **एवं** यथोक्तेन प्रकारेण **असम्मूढः** सम्मोह-वर्जितः सन् **जानाति** अयमहमस्मि इति **पुरुषोत्तमं** **सः** **सर्ववित्** सर्वात्मना सर्वं वेत्तीति सर्वज्ञः सर्व-भूतस्थं **भजति** **मां** **सर्वभावेन** सर्वात्मतया हे **भारत**।। १९।।

अस्मिन्नध्याये भगवत्तत्त्वज्ञानं मोक्ष-फलमुक्त्वा अथेदानीं तत्स्तौति -

**इति गुह्यतमं शास्त्रम् इदमुक्तं मयानघ।**

**एतद् बुद्ध्वा बुद्धिमान्स्यात् कृतकृत्यश्च भारत।। १५.२० ।।**

ॐ तत्सत् इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः।।

इतीति। **इति** एतत् **गुह्यतमं** गोप्यतममत्यन्त-रहस्यमित्येतत्। किं तत् **शास्त्रम्**।

यद्यपि गीताख्यं समस्तं शास्त्रमुच्यते तथापि अयमेवाध्याय इह शास्त्रमित्युच्यते स्तुत्यर्थं प्रकरणात्।

सर्वो हि गीता-शास्त्रार्थोऽस्मिन्नध्याये समासेनोक्तः।

न केवलं गीता-शास्त्रार्थ एव किन्तु सर्व-वेदार्थ इह परिसमाप्तः।

यस्तं वेद स वेदवित्(गी १५.१) वेदैश्च सर्वैरहमेव वेद्यः (गी १५.१५) इति चोक्तम्।

**इदम्** **उक्तं** कथितं **मया** हे **अनघ** अपाप।

**एतत्** शास्त्रं यथा-दर्शितार्थं **बुद्ध्वा** **बुद्धिमान्** **स्याद्** भवेत् नान्यथा।

**कृतकृत्यश्च** **भारत** कृतं कृत्यं कर्त्तव्यं येन स कृत-कृत्यः।

विशिष्ट-जन्म-प्रसूतेन ब्राह्मणेन यत्कर्त्तव्यं तत् सर्वं भगवत्तत्त्वे विदिते कृतं भवेदित्यर्थः।

न च अन्यथा कर्त्तव्यं परिसमाप्यते कस्यचिद् इत्यभिप्रायः। सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते (गी ४.३३) इति चोक्तम्। एतद्धि जन्म-साफल्यं ब्राह्मणस्य विशेषतः प्राप्यैतत्कृतकृत्यो हि द्विजो भवति नान्यथा (मनु १२.९३) इति च मानवं वचनम्।

यत एतत् परमार्थ-तत्त्वं मत्तः श्रुतवानसि अतः कृतार्थस्त्वं भारतेति।। २० ।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये पञ्चदशोऽध्यायः।।